श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्री अपर्याप्तामृतविंशतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री अपर्याप्तामृतविंशतिः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

अपर्याप्तामृतस्वामिसपर्यासक्तचेतसाम्।
विपर्यासविहीनानां उपर्याशास्तु मे सदा॥ 1 ॥

मधुरं मधुचित्रोत्थं मधुजिन्मधु किञ्चन।
माधुरं माधुरं चापि मे धुरं च वहत्यहो॥ 2 ॥

शान्तं सन्मधुरं गभीरमनघं सौन्दर्यसारास्पदं
सर्वामोदविधायि चेतसि सपद्याविश्य संपश्यताम्।
श्रीभूभूषितपार्श्वभूमियुगलं सम्पूरयत्स्वं गृहं
चक्षुष्मत्तपसः फलं विजयते शार्ङ्गीति किञ्चिन्महः॥ 3 ॥

किं गेहैर्गलितैर्धनैरपि गतैः केदारजालैस्तथा
किं वा तैरपि वस्तुभिः प्रियतमैः यातैर्मनोहारिभिः।
बन्धुभ्यश्च समागतैः परिभवैः किं वा ममात्रागतम्
श्रीमत्कोमलवल्लिकासहचरं श्रीशार्ङ्गिणं पश्यतः॥ 4 ॥

शङ्खं चक्रमसिं गदामपि तथा शार्ङ्गं च धत्से समं
शार्ङ्गीत्येव तव प्रथेह धनुषा तत्केन न ज्ञायते।
ज्ञातं तद्भवतस्स्मितेन मृदुना भावान्वितेनाधुना
सम्प्राप्तं हि धनुष्पुरात् जनमिमं त्रातुं नतं मामिति॥ 5 ॥

अमृतममृत ! दत्वा मोहिनीभावतस्त्वं
किमिति परिणतोऽभूः पूरुषस्सुन्दराङ्गः।
इदमिदमिति तत्त्वं पृष्ठतो देवदेव !
त्वयि विनिहितदृष्टिर्वक्त्त्यसौ कुम्भनाथः ॥ 6 ॥

त्वय्याल्न्दभावाः किल कीर्तितास्ते
आल्वार् समाख्यास्तदिदं प्रसिद्धम्।
आल्वान् त्वमासी कथमेतदेवं
आल्वान् महीसारजसारवाचि ॥ 7 ॥

कावेरीलहरीकणैरुपहृतैरभ्युक्षितो वायुना
कावेरीजलवर्धिताभिरभितः संवीजितश्शालिभिः।
कावेरीसलिलैरतीव मधुरैराप्लावितः पूजकैः
कावेरी बहुधा गतिं विदधतीं पश्यन्निवास्ते प्रभुः ॥ 8 ॥

शेते कामपि कालमेघमधुरां मूर्तिं समादाय यः
कावेरीजलशीतलावनिसुखं भोक्तुं भुजङ्गाधिपे।
तिष्ठत्यद्भुतहेमरम्यसुतनुः पञ्चायुधीमण्डितः
कावेरीजलवर्धितावनिरुहां शोभां च यो वीक्षितुम् ॥ 9 ॥

यः काले कलिकालदोषकलुषा वीथीश्च तास्तास्तथा
तत्रस्थाञ्च नरान् दृशा च गतिभिः सम्पावयन् सादरम्।
सञ्चारं वितनोति सायमपि च प्रातश्च मध्यन्दिने
तस्मै हन्त ! दयाघनाय महते श्रीशार्ङ्गधाम्ने नम ॥ 10 ॥

शेषे शयानस्तव पृष्ठभागे
त्वमेव भूयस्तनुरम्यभावम्।
आलोकितुं सादरमीषदेवम्
उत्थानभावं तनुषे मुखेन ॥ 11 ॥

अमृतममृत ! दातुं मोहिनीभावमिच्छन्
किमिति परिणतस्त्वं पूर्वमेवं पुमान् सन्।
अथ किल समये श्रीहेमनामा मुनिस्त्वां
सुभग इति विचिन्त्य स्वां सुतां ते स चादात्॥ 12 ॥

हेमाभिधानमुनिनाथतपःफलं त्वं
हेमापगासुभगतीरभुवि स्थितस्सन्।
हेमाम्बुजातरमणीरमणीयपार्श्वः
हे मां विलोकय दृशा दययाऽऽदरेण॥ 13 ॥

भवतो ममापि न भिदा मनागपि
प्रियशार्ङ्गनाथ ! सखिताऽस्तु तद्धृशम्।
तव च प्रसिद्धिरवनौ तथैव मे
ननु पश्य चापलतयैव वर्धते॥ 14 ॥

स्वामिन् ! चापलतागुणस्तव तथा लोके प्रसिद्धो बभौ
दोषश्चापलता पुनर्मम तथा यद्यन्यथापि स्थितिः।
त्वामाश्रित्य गुणा भवन्ति भगवन् ! दोषा अपीति स्थितं
मामाश्रित्य गुणा अपीह नितरां दोषा भवन्तीति च॥ 15 ॥

तस्माच्चापलतां मयि स्थितिमतीं व्यावर्त्य दुर्मार्गतः
त्वय्यीदृङ्ग्धुरे नियोज्य गुण इत्यानन्दयन् रक्ष माम्।
एवं चेत् त्वयि यद्विभाति तदिदं चातुर्यमव्याहतं
क्षान्तिस्सा करुणाऽपि सा निरुपमा सर्वाभिनन्द्या भवेत्॥ 16 ॥

त्वयि प्लुतमना मुनिर्वकुलभूषणो या जगौ
श्रुतावमृतवर्षणीरमृत ! नाथ ! गाथा दश।
मृता इव तिरोहिता ननु परास्सहस्राधिका:
स्वयं भुवि हिता हि ताः भृशमजीवयस्सर्वतः॥ 17 ॥

भवद्विषयिणीरिमा दश सहस्रमध्यस्थिताः
पठन्ति भुवि ये नरा त इह कामभूताः मताः।
प्रिया हरिणचक्षुषामिति जगौ फलं चोचितं
तवामृत ! मम प्रभो ! मधुरिमा कथं वर्ण्यते ॥ 18 ॥

श्रान्तं त्रिविक्रमकृतावपि दण्डकायां
वृन्दावने च मृदुलं तव पादपद्मम्।
पीताम्बरान्तपरिवीजितमद्य नाथ !
मच्चित्तपद्मदलमध्यगतं विधेयाः ॥ 19 ॥

मौलौ बलेर्विनिहितं विबुधद्विषोऽथ
न्यक्कुर्वतः कविगिरं च हितं पदाब्जम्।
मौलौ ममाऽपि मधुसूदन ! तादृशस्य
कोऽयं विलम्ब इह ते भगवन् ! विधातुम् ॥ 20 ॥

बद्धं पदाम्बुजसमीपसमाश्रयं त्वं
सारं दृशा कलयसे नितरामबद्धम्।
एनं जनं च कलयैवमिमं प्रबन्धं
नैवं तथा कलय सोऽथ शुकं स्मरामि ॥ 21 ॥

अज्ञोऽहं हितमेतदेतदहितं तस्मादिदं कार्यमि -
त्येतन्नेति विविच्य वेदितुमहो का नाम शक्तिर्मम।
एकं त्वां शरणं गतोऽस्मि भगवन् ! श्रीकोमलाम्बापते !
यन्मे स्यादुचितं हितं तदखिलं कार्यं त्वयैव प्रभो ! ॥ 22 ॥

कनत्कनकपद्मिनीकमलवासिनीभूषणं
मनोहरमुखाम्बुजं किमपि मञ्जुमन्दस्मितम्।
अभीतिमधुरं करं विनमतां पुरो दर्शयत्
तदेतदमृताभिधं भवतु दैवतं श्रेयसे ॥ 23 ॥

अपर्याप्तामृतस्वामिविषया श्रीनिधीरिता।
अपर्याप्तामृतात्मेयं विंशतिः शंसतां मुदे॥ 24 ॥

॥ इति श्री अपर्याप्तामृतविंशतिः समाप्ता॥

sunder kidāmbi
prapatti dot com
sunder kidāmbi